# Shri Krishna Kathamrita Mangala Shlokah

# શ્રીકૃષ્ણકથામૃતમઙ્ગલશ્લોકાઃ

## Document Information

Text title : Krihna Kathamrita Mangala ShlokAH

File name : kRRiShNakathAmRRitamangalashlokAH.itx

Category : vishhnu, varadAnanda, krishna

Location : doc_vishhnu

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Transliterated by : Arun Parlikar

Proofread by : Arun Parlikar

Description/comments : First verse of each of 18 sargas of Marathi Krihna Kathamrita

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : June 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણકથામૃતમઙ્ગલશ્લોકાઃ

ॐ શ્રી

॥ શ્રીશઙ્કર ।

સર્ગસ્થિત્યન્તકર્તારૌ ભક્તિગમ્યાવગોચરૌ
ઉમામહેશ્વરૌ વન્દે સત્કૃપાસરિદર્ણવૌ ॥ ૧॥

સૃષ્ટ્વાઽખિલં વિશ્વમિદં વિચિત્રમ્
સ્થૂલઞ્ચ સૂક્ષ્મઞ્ચ ચરાચરઞ્ચ ।
તથાપિ નિત્યં નિરુપાધિકો યઃ
તસ્મૈ મહેશાય નમોઽસ્તુ શશ્વત્ ॥ ૨॥

મૌલૌ યો બિભૃતે શુભાં સુરધુનીં ભાલે કલામૈન્દવીમ્
નેત્રે મન્મથદાહકાનલશિખાં કણ્ઠે વિષં ભીષણમ્ ।
વામાઙ્કે ગિરિજાં વપુષ્યુપચિતં ભસ્મ સ્મશાનોદ્ભવમ્
તં વન્દે શિરસા ભુજઙ્ગરશનં સર્વૈરલિપ્તં શિવમ્ ॥ ૩॥

સત્યં નશ્વરમસ્તુ વા જગદિદં જીવઃ શિવો વેતરઃ
શૂન્યં વા પરમાણુરસ્તુ જગતો હેતુઃ પ્રધાનં ચ વા ।
યોગો જ્ઞાનમથાસ્તુ કર્મ નિતરાં નિઃશ્રેયસે સાધનમ્
જાનીમો ગિરિશૈતદેવ ભગવન્ ત્વં નઃ શરણ્યઃ પ્રભુઃ ॥ ૪॥

રત્નૌઘે સતિ મઙ્ગલાય જગતો હાલાહલં ભીષણમ્
સ્વર્ગાદીન્યતિસુન્દરાણિ ભુવનાન્યુજ્ઝિત્ય ચિત્યાસ્થલમ્ ।
પૌલસ્ત્યે ચ નિધાય યેન વિભવં ભિક્ષાટનં સ્વીકૃતમ્
તં વન્દે વિગતસ્પૃહં શિવકરં મૃત્યુઞ્જયં સાદરમ્ ॥ ૫॥

વેદૈશ્ચ સર્વૈઃ સ્મૃતિભિઃ પુરાણૈઃ
શાસ્ત્રૈશ્ચ તૈસ્તૈર્મુનિભિઃ પ્રણીતૈઃ ।
જ્ઞાતં ન સમ્યક્ ખલુ યસ્ય રૂપમ્

ભક્તપ્રિયં તં ગિરિશં નમામિ ॥ ૬॥

યદ્વિધતે ક્ષિતિતલેઽસ્તુ શુભાશુભં તત્
 વિદ્યુત્કણેન ઘટિતં ત્વિતિ દૃશ્યતેઽન્તે ।
એવં વરાવરમતાનિ લસન્તુ કામમ્
 ધ્યેયં ત્વમેવ શશિશેખર માનવાનામ્ ॥ ૭॥

હે પાર્વતીશ કરુણાઘન શૂલપાણે
 દ્વેષ્યઃ પ્રિયો ન તવ કોઽપિ સમાનબુદ્ધેઃ ।
અઙ્ગીકરોષિ ભગવન્ ગરલેન્દુસર્પાન્
 કિં નિષ્ઠુરોસિ વદ કેવલમસ્મદર્થે ॥ ૮॥

સકલસુરવરિષ્ઠં સંસ્તુતં વેદસઙ્ઘૈઃ
 અચરચરપદાર્થે વ્યોમવદ્ વ્યાપ્તદેહમ્ ।
વિનતજનદયાલું ભક્તકલ્પદ્રુમં તમ્
 ચરણનિહિતભાલં ચન્દ્રમૌલિં નમામિ ॥ ૯॥

યસ્માદ્ધિ શાસ્ત્રસરિદુદ્ગમ આબભૂવ
 યત્ સ્વાશ્રયં તનુભૃતાં ભય-વિહ્વલાનામ્ ।
તાપાપનોદનિપુણં પરમવ્યયં તત્
 દિવ્યં મહેશ્વરપદાબ્જમહં નમામિ ॥ ૧૦॥

ગલે લુઠતિ પન્નગઃ શિરસિ રાજતે ચન્દ્રમા
 તપસ્તપતિ સંયમી ગિરિજયા સમં દિવ્યતિ ।
સ્મરં દહતિ મોહિનીમપિચ યાચતે યો રતિમ્
 વિચિત્રચરિતં ભજે ગતભિદં પ્રભું તં શિવમ્ ॥ ૧૧॥

વ્યોમાનિલાનલજલા વનિસોમસૂર્ય
 હોત્રીભિરષ્ટ-તનુભિર્જગદેકનાથઃ ।
યસ્તિષ્ઠતીહ જનમઙ્ગલધારણાય
 તસ્મૈનમોસ્તુ નિરપેક્ષહૃદે શિવાય ॥ ૧૨॥

તદ્દૂરેઽસ્તિ તદન્તિકેઽસ્ત્યપિચ તદ્ બાહ્યે તથાઽભ્યન્તરે
 તન્નૈજત્યથ ચૈજતીતિ નિગમો જાનાત્યજાનન્ પરમ્ ।
દેવેત્થં વચનં વિસઙ્ગતમિદં બોદ્ધું ન શક્તા વયમ્
 જાનેઽહં ત્વિદમેવ મે હિતકરં માતાપિતા નઃ શિવઃ ॥ ૧૩॥

કૈલાસેઽતિમનોહરે નિજપદન્યાસૈર્મહીં પાવયન્
    નૃત્યોત્ક્ષેપવિકીર્ણપિઙ્ગલકચૈઃ સંવેષ્ટયન્નમ્બરમ્ ।
ઉચ્ચૈસ્તાલમૃદઙ્ગવાદનરતૈઃ સંસ્તૂયમાનઃ સુરૈઃ
    કુર્વન્ તાણ્ડવમીશ્વરો વિજયતાં નઃ શ્રેયસે પ્રેયસે ॥ ૧૪॥

ભીષાઽસ્માત્ પવતે મરુત્ તપતિ વૈ સૂર્યઃ પ્રસિદ્ધા શ્રુતિઃ
    તિષ્ઠન્ સર્વહૃદિ ત્વમેવ પુરુષવ્યાપારમાત્રેશ્વરઃ ।
એવં સદ્ભિરથાનુમોદિતમપિ શ્રી જ્ઞાનદેવાદિભિઃ
    નો જાને ગિરિજાપતે તદપિ કિં કામં મનો ધાવતિ ॥ ૧૫॥

કર્માકર્મવિવેકમૂઢમનસાં બુદ્ધિં વિધાય સ્થિરામ્
    મોહધ્વાન્તમપાકરોતિ નિતરાં યસ્યપ્રભા ચિન્મયી ।
યસ્મિન્ બ્રહ્મણિ રાજતે જગદિદં સિન્ધૌ તરઙ્ગોપમમ્
    તં વિશ્વેશમહં નમામિ સતતં ગઙ્ગાધરં શ્રીગુરુમ્ ॥ ૧૬॥

મહાભીષણં તાણ્ડવં સંવિધિત્સુમ્
    જ્વલલ્લોચનં કર્કશં ગર્જયન્તમ્ ।
મહીં શીર્ણશૈલાં ભૃશં કમ્પયન્તમ્
    પ્રભું ભીમરૂપં હરં તં નમામિ ॥ ૧૭॥

હે ગઙ્ગાધર દેવદેવ ચરણૌ વન્દે ત્વદીયૌ શુભૌ
    દીનં મામુરરીકરોષિ ભગવન્, પ્રાયોઽપિ હીનં ગુણૈઃ ।
સન્તુષ્ટોસ્મિ તથાધુનાઽખિલગુરો શમ્ભો પ્રસાદાત્ તવ
    સર્વે સન્તુ નિરામયાઃ ક્ષિતિતલે ભદ્રાણિ પશ્યન્તુ ચ ॥ ૧૮॥

॥ નમઃ પાર્વતી પતે હર હર મહાદેવ ।

ઇતિ સ્વામી વરદાનન્દભારતીવિરચિતાઃ શ્રીકૃષ્ણકથામૃતમઙ્ગલશ્લોકાઃ સમ્પૂર્ણાઃ ।

ભાવાર્ચના (પ્રાચાર્ય અ. દા. આઠવલે)

These verses are first one from each chapter of
shrIkRiShNakathAmRita Marathi text
composed by Swami Varadananda Bharati.

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Encoded and proofread by Arun Parlikar

*Shri Krishna Kathamrita Mangala Shlokah*
pdf was typeset on June 4, 2023

Please send corrections to *sanskrit@cheerful.com*